
### सप्तमः पाठः
# भोपालनगरम्



(सन्दीपः स्कूटरयानेन मार्गे गच्छन् सुनीलं पश्यति? ततः स्कूटरयानात् अवतीर्य सुनीलस्य समीपं गच्छति, पृच्छति च।)

**सन्दीपः** – भो सुनील! त्वम् अत्र किं करोषि?

**सुनीलः** – हे सन्दीप! अहम् अस्य सरोवरस्य सौन्दर्यं पश्यामि।

**सन्दीपः** – मित्र! अयं सरोवरः तु अस्माकं भोपालनगरस्य वैशिष्ट्यम् अस्ति।

**सुनीलः** – किं कथयसि? अहं तु न जानामि। यतोऽहम् अत्र भोपालनगरं प्रथमवारम् एव आगतः।

**सन्दीपः** – यद्येवं तर्हि आगच्छ अहं त्वां भोपालनगरं दर्शयामि। पुरा ''भोजपालः'' इति भोपालनगरस्य नाम आसीत्। भोपालनगरं मध्यप्रदेशस्य राजधानी अस्ति। अस्य नगरस्य महत्त्वं प्राचीनकालादेव वर्तते। किं त्वं नौकाविहारं कर्तुम् इच्छसि?

**सुनीलः** – आम्, आगच्छ आवां नौकाविहारं कुर्वन्तावेव भोपालनगरस्य सौन्दर्यं पश्यावः।

**सन्दीपः** – इदं नगरं सरोवराणां नगरम् इति कथ्यते। अत्रस्थः विशालतमः सरोवरः देशे एकः

एव अस्ति। सरोवरे नौकाविहारः अस्य सौन्दर्यं द्विगुणयति। वर्षाकाले तु नगरस्य हरीतिमां दृष्ट्वा नगरवासिनः पर्वतीयस्थानानि (हिलस्टेशन् इति) विस्मृत्य अत्रैव रमन्ते। अस्य नगरस्य प्राकृतिकं सौन्दर्यं दर्शनीयम्। 'मयूर-उद्यानम्', 'नेहरु-उद्यानम्', 'चिनार-उद्यानम्', बालोद्यानम्, वनविहारः, च नगरस्य प्राकृतिकशोभां संवर्धयन्ति।

**सुनीलः** – सन्दीप! साञ्ची, भोजपुरम्, भीमबेटका इत्यादीनि ऐतिहासिकस्थानानि अस्य नगरस्य समीपे एव सन्ति।

**सन्दीपः** – आम्, भोजपुरे विशालं शिवमन्दिरम् अस्ति। साञ्चीस्तूपः तु विश्वप्रसिद्धः एव। भीमबेटकायां शैलचित्राणि सन्ति। एतानि स्थानानि दृष्ट्वा जनाः मुदिताः चकिताः च भवन्ति। ते दूरतः एव अत्र आगच्छन्ति।



**सुनीलः** – अन्यत् किम्?


**सन्दीपः** – भोपालनगरस्य द्वौ भागौ स्तः। नूतनभोपालनगरम् अपरं च प्राचीनभोपालनगरम्। विधानसभाभवनं, लक्ष्मीनारायणमन्दिरं (बिरलामन्दिरं), सचिवालयः, मन्त्रालयश्च नूतनभोपालनगरे सन्ति। प्राचीनभोपालनगरे ताजुलमस्जिदः, मोतीमस्जिदः, नेवरीमन्दिरं, गुफामन्दिरम् इत्यादयः सन्ति।

गुफामन्दिरे प्रतिवर्षं श्रावणमासे प्रत्येकसोमवासरे मेलापकः भवति। ताजुलमस्जिदः एशिया-महाद्वीपस्य विशालतमः मस्जिदः अस्ति। अत्र प्रतिवर्षं 'इज्तिमा' नामकं धार्मिकसम्मेलनं भवति; यस्मिन् देशविदेशेभ्यः धार्मिकाः आगच्छन्ति।

प्राचीनभोपालनगरे आभूषणानां, धान्यानां, वस्त्राणां, पुस्तकानां च असङ्ख्याः आपणाः सन्ति।



लक्ष्मीनारायणमन्दिरम्



विधानसभाभवनम्

**सुनीलः** – सन्दीप! मम शिक्षकः मां 'भारत हैवी इलेक्ट्रिकल्स' (BHEL) इति विषये किमपि उक्तवान्। तत् किम्?

**सन्दीपः** – उद्योगक्षेत्रेऽपि इदं नगरं प्रसिद्धम्। अस्मिन् नगरे एकं महत् विद्युत्संयन्त्रं स्थापितम्। इदं संयन्त्रम् एव 'भारत हैवी इलेक्ट्रिकल्स लिमिटेड' (BHEL) इति नाम्ना प्रसिद्धम् अस्ति। भोपालनगरस्य समीपे मण्डीदीपं स्थानम् औद्योगिकनगरम् इति प्रसिद्धम् अस्ति।

भारतभवनम् अत्रस्थं विश्वप्रसिद्धं कलाकेन्द्रम् अस्ति। नेहरुक्रीडाङ्गणं नगरवासिनां क्रीडानुरागं दर्शयति। 'आञ्चलिकविज्ञानकेन्द्रम्' नगरस्य महत्त्वं सूचयति। इन्दिरागान्धि-मानवसङ्ग्रहालयः अपि अत्र विद्यते।

प्रारम्भिकशिक्षायाः केन्द्रम् अपि अस्मिन् नगरे अस्ति। गान्धिनगरे 'राजाभोजवायुयान-स्थानकम्' अपि अस्ति।

(सुनीलः सन्दीपः च भ्रमन्तौ तात्याटोपेनगरम् आगतौ)



**सुनीलः** – रे सन्दीप! इदं तु किमपि रोचकस्थानं दृश्यते।

**सन्दीपः** – नगरस्य सर्वेषां प्रियं स्थानं हट्टं च 'न्यूमार्केट' इति अस्ति। अत्र आबालवृद्धाः स्वमनोरञ्जनार्थम् आवश्यकवस्तूनि क्रेतुं च आगच्छन्ति। आवाम् अपि मधुराणि रसगोलकानि क्रीत्वा खादावः।

**सुनीलः** – शोभनम् अस्ति भोपालनगरम्।

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| स्कूटरयानेन | = | स्कूटर से | अवतीर्य | = | उतरकर |
| यद्येवं | = | यदि ऐसा है | द्विगुणयति | = | दोगुना करता है |
| वैशिष्ट्यम् | = | विशेषता | दर्शयामि | = | दिखाता हूँ |
| कुर्वन्नेव | = | करते हुए ही | अत्रस्थः | = | यहाँ का |
| विस्मृत्य | = | भूलकर | इत्थम् | = | ऐसा |
| उक्तवान् | = | कहा था | रसगोलकानि | = | रसगुल्ले |
| वायुयानस्थानकम् | = | हवाईअड्डा | | | |

## अभ्यासः

**1. एकपदेन उत्तरं लिखत–**

क) विशालं शिवमंदिरं कुत्र अस्ति?

ख) भोपालनगरं कस्य प्रदेशस्य राजधानी अस्ति?

ग) श्रावणमासे प्रत्येकसोमवासरे कुत्र मेलापकः भवति?

घ) भोपाले विश्वप्रसिद्धं कलाकेन्द्रं किम् अस्ति?

ङ) भोपाले राजाभोजवायुयानस्थानकं कुत्र अस्ति?

**2. एकवाक्येन उत्तरं लिखत–**

(क) पुरा भोपालनगरस्य नाम किम् आसीत्?

(ख) भोपालनगरस्य जनाः कुत्र नौकाविहारं कुर्वन्ति?

(ग) 'इज्तिमा' नाम धार्मिकसम्मेलनं कुत्र आयोज्यते?

(घ) आञ्चलिकविज्ञानकेन्द्रं कुत्र अस्ति?

(ङ) भारतहैवीइलेक्ट्रिकल्सलिमिटेड इति संयन्त्रं कुत्र अस्ति?

**3. उचितशब्देन रिक्तस्थानं पूरयत–**

(लक्ष्मीनारायणमन्दिरम् (बिरलामन्दिरम्), ताजुलमस्जिदः, नौकाविहारं, विधानसभाभवनम्, भोजपुरम्)

(क) नूतनभोपालनगरे .............. अस्ति।

(ख) भोपालनगरस्य सरोवरे जनाः .............. कुर्वन्ति।

(ग) प्राचीन भोपाले ............... अस्ति।

(घ) ................ नूतनभोपाले अस्ति।

(ङ) ................. समीपे अस्ति।

**4 रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत–**

(कुत्र, कस्मिन्, कस्य, कानि, केषाम्)

(क) इदं नगरम् <u>सरोवराणां</u> नगरं कथ्यते।

(ख) भीमबेटकायां <u>भित्तिचित्राणि</u> सन्ति।

(ग) <u>भोपालनगरस्य</u> द्वौ भागौ स्तः।

(घ) 'इन्दिरागान्धि-मानवसङ्ग्रहालयः' अपि <u>अत्र</u> वर्तते।

**5. विलोमपदानां मेलनं कुरुत–**

| | (अ) | (ब) |
|---|---|---|
| (क) | बालः | आगच्छति |
| (ख) | नगरम् | नवीनम् |
| (ग) | विशालतमः | विक्रेतुम् |
| (घ) | प्राचीनम् | ग्रामम् |
| (ङ) | क्रेतुम् | वृद्धः |
| (च) | गच्छति | लघुतमः |

**6. शुद्धकथनस्य समक्षं 'आम्' अशुद्धकथनस्य समक्षं 'न' इति लिखत–**

(क) प्राचीनभोपालनगरे लक्ष्मीनारायणमन्दिरम् (बिरलामन्दिरम्) अस्ति। ☐

(ख) ताजुलमस्जिदः एशिया-महाद्वीपस्य विशालतमः मस्जिदः अस्ति। ☐

(ग) भोपालनगरस्य प्राकृतिकं सौन्दर्यं दर्शनीयम्। ☐

(घ) भोपालनगरस्य जनाः उत्सवप्रियाः न सन्ति। ☐

(ङ) 'नेहरुक्रीडाङ्गणं' नगरवासिनां क्रीडानुरागं दर्शयति। ☐

(च) भोपालनगरं भारतदेशस्य मध्यभागे अस्ति। ☐

**7. उदाहरणानुसारं योजयत–**

**यथा–** हरे + अव – हरेऽव

(क) औद्योगिकक्षेत्रे + अपि –

(ख) विष्णो + अव –

**8. निर्देशानुसारं धातुरूपाणि लिखत–**

| | धातुः | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|
| **यथा–** | रम् | प्रथमपुरुषः | रमते | रमेते | रमन्ते |
| (क) | वृत् (वर्त्) | प्रथमपुरुषः | | | |
| (ख) | लभ् | प्रथमपुरुषः | | | |
| **यथा–** | लभ् | मध्यमपुरुषः | लभसे | लभेथे | लभध्वे |
| (ग) | रम् | मध्यमपुरुषः | | | |
| (घ) | वृत् (वर्त्) | मध्यमपुरुषः | | | |
| **यथा–** | वृत् (वर्त्) | उत्तमपुरुषः | वर्ते | वर्तावहे | वर्तामहे |
| (ङ) | लभ् | उत्तमपुरुषः | | | |
| (च) | रम् | उत्तमपुरुषः | | | |

**योग्यताविस्तारः –**

अध्यापकैः सह भोपालदर्शनस्य कार्यक्रमः कल्पनीयः, योजनीयः च।

**उचितमेलनं कुरुत–**

(क) ताजमहल् — दिल्लीनगरे

(ख) स्वर्णमन्दिरम् — आबूनगरे

(ग) जामामस्जिद् — भोपालनगरे

(घ) सूर्यमन्दिरम् — अमृतसरनगरे

(ङ) भोजपुरम् — आगरानगरे

*भोपालाख्या रम्या राजधानी*